# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा** - आचार्य-१ ( Sem_2 )　　**प्रश्नपत्र-५**　　**गुणाः** - ७०

**विषयः** - धर्मशास्त्रम्　　CE 4.2.2　　**समयः** - ११:०० तः ०२:००

**दिनाङ्कः** - 22/04/2016　　**सन्दर्भग्रन्थः** - याज्ञवल्क्यस्मृतिः - व्यवहाराध्यायः

---

**॥ प्रथमान्वितिः ॥**

**प्रश्न-१　( क ) अधोलिखितकारिकाषु एकां कारिकां ससन्दर्भं लिखत ।　०४**

१. स्मृत्याचारव्यपेतेन मार्गेणाऽऽधर्षितः परैः ।
आनेदयति चन्द्राज्ञे व्यवहारपदं हि तत् ॥

२. अध्यादीनां विहर्तारं धनिने दापयेदधनम् ।
दण्डं च तत्समं राज्ञे शक्यपेक्षमथापि वा ॥

**( ख ) अधोलिखितेषु एकं प्रश्नं निबन्धात्मकं लिखत ।　०६**

१. कलहः एवं साहसापराधे अभिप्रयोगः । २. दुष्टसाक्षिलक्षणम् – साक्षिणां क्रमः ।

**( ग ) षट्टिप्पणीषु टिप्पणीत्रयं साधयन्तु ।　०६**

१. व्यवहारे सभासदयोग्यता ।　२.विवादचतुष्ट्यम् ।
२. सपणविवादनिर्णयः ।　४. लेखभोगयोः विचारः ।
५. ऋण-अदाने जात्यानुसारेण कार्यम् ।　६. प्रातिभाव्यस्यार्थः ।

**( घ ) द्वित्रिवाक्यैः उत्तरं यच्छत । ( द्वयमेव )　०४**

१. धर्मविरुद्धसभासदः कः दण्डः?　२.असिद्धव्यवहारः नाम किम्?
३. उपनिधेः परिभाषा का?　४.उपनिधेः भोग्यदण्डः कः?

**॥ द्वितीयान्वितिः ॥**

**प्रश्न-२　( क ) अधोलिखितकारिकाषु एकां कारिकां ससन्दर्भं विवेचयत ।　०४**

१. यदि कुर्यात्समास्यन् पत्न्यः कार्याः समांशिकाः । न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वसुरेण वा ॥
२. क्लीबोऽयं पतितस्तज्जः पङ्गुरुन्मत्तको जडः । अन्धोऽचिकित्स्यरोगाद्या कर्तव्याः स्युर्निरंशकाः ॥

**( ख ) अधोलिखितेषु एकं प्रश्नं निबन्धात्मकं लिखत ।　०४**

१. दायशब्दस्यार्थं प्रतिपाद्य दायभेदान् के? प्रतिपादयत ।
२. स्त्रीधनम् एवं स्त्रीधनस्योत्तराधिकारिणं वर्णयत ।

**( ग ) टिप्पणी द्वयं साधनीयम् ।　०४**

१. सीमाविवादः ।　२.पशुनाशे पशुपालदण्डः ।
३. दत्ताप्रदानिकस्वरूपम् ।　४.अदत्तस्य प्रकाराः ।

**( घ ) एकेन वाक्येन उत्तरं यच्छत । ( त्रयमेव )　०३**

१. मर्यादाभंगे कः दण्डः?　२.क्षेत्रहरणे कः तण्डः?
३. सीमाविवादे कः निर्णयः?　४.पशुविशेषे कः सम्बन्धितदण्डः?
५. दानं कियत् देयम्? किं न देयम्?

**॥ तृतीयान्वितिः ॥**

**प्रश्न-३ ( क ) अधोलिखितकारिकाषु एकां कारिकां ससन्दर्भं विवेचयत । ०४**

१. कृतशिल्पोऽपि निवसेत्कृतकालं गुरोर्गृहे ।
अन्तेवासी गुरुप्राप्तं भोजनस्तत्फलप्रदः ॥

२. बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः ।
शत्यस्तदधिकः पादनाशाकर्णकरादिषु ॥

**( ख ) अधोलिखितेषु एकं प्रश्नं निबन्धात्मकं लिखत । ०४**

१. वाक्यपारुष्यलक्षणप्रकाराः दण्डश्च वर्ण्यः ।

२. दण्डपारुष्यलक्षणं, भेदाः, विधिनिर्णयः सर्वमेतद् विवेचयत ।

**( ग ) टिप्पमीद्वयं साधनीयम् । ०४**

१. दासानां भेदाः । २. संविद्ध्यतिक्रमलक्षणम् ।

३. द्यूताध्यक्षस्य नियुक्तिः । ४. गालीप्रदाने दण्डः ।

**( घ ) एकेन वाक्येन उत्तरं यच्छत । ( त्रयमेव ) ०३**

१. अंगभंगे कः दण्डः? २. कापट्यपूर्णद्यूते कः दण्डः?

३. शुश्रुक्षकस्य कति प्रकाराः? ४. निष्ठुराक्रोशस्य कः दण्डः?

२. धर्मरक्षार्थं कस्य नियुक्तिः?

**॥ चतुर्थान्वितिः ॥**

**प्रश्न-४ ( क ) अधोलिखितकारिकाषु एकां कारिकां ससन्दर्भं विवेचयत । ०४**

१. भेषजस्नेहलवणगन्धधान्यगुडादिषु ।
पण्येषु प्रक्षिपन्हीनं पणान्दाय्यस्तु षोडश ॥

२. नाटकेगृह्यते चौरो लोप्त्रेणाथ पदेन वा ।
पूर्वकर्मापराधी च तथा चाशुद्धवासकः ॥

**( ख ) अधोलिखितेषु एकं प्रश्नं निबन्धात्मकं लिखत । ०६**

१. साहसलक्षणं विलिख्य प्रथममध्यमोत्तमसाहसं वर्णयत ।

२. स्तेयलक्षणं विलिख्य स्तेयग्रहणोपायान् सन्देहनियमान् वर्णयत ।

**( ग ) टिप्पणीद्वयं साधनीयम् । ०६**

१. अल्पज्ञानिवैद्यस्य दण्डः । २. तुलायां धूर्तताकृतदण्डः ।

३. ब्राह्मणचौरेभ्यो दण्डः । ४. हीनस्त्री-हीनवर्णस्य परस्त्रीव्यभिचारे कः दण्डः?

५. राजकोशापहरणे कः दण्डः? ६. विशेषापराधे कः विशेषः दण्डः?

**( घ ) एकेन वाक्येन उत्तरं यच्छत । ( त्रयमेव ) ०४**

१. वधदण्डः कदा भवकति ? २. मध्यमसाहसे कः दण्डः ?

३. राज्यात् निर्वासितः कः भवेत् ? ४. जिह्वाकर्तनं कदा करणीयम् ?

५. चतुष्पदां दोषः कदा न भवति ? ६. संन्यासिनीसंभोगे कः दण्डः ?

७. कण्ठे शीलां बद्ध्वा कस्यै दण्डो देयः ?

----------------------